# संस्कृतवार्ता:

**दिनाङ्क :-15.02.2025**

**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री / फ्रांसामेरिका-यात्रा**

प्रधानमन्त्री नरेन्द्र-मोदी गतरात्रौ अमेरिका-फ्रांस-देशयो: सफलाधिकारिक-यात्रां विधाय स्वदेशं प्रत्यागत:। अमेरिकीय-राष्ट्रपते: डोनाल्ड-ट्रम्पस्य आमन्त्रणम् अभिलक्ष्य प्रधानमन्त्रिण: इयम् अमेरिकीय-यात्रा अभवत्। प्रधानमन्त्री नरेन्द्र-मोदी उक्तवान् यत् भारतामेरिका-देशौ आतङ्कवादं विरुध्य सङ्घर्षे दृढतया उपस्थितौ स्त:। एतौ पारेसीमम् आतङ्कवादम् उन्मूलयितुं सहमतौ अपि जातौ। ह्य: वॉशिंग्टनडीसी-नगरे व्हाइटहाउस-इत्यत्र अमेरिकीय-राष्ट्रपतिना डोनाल्ड-ट्रम्प-इत्यमुना साकं द्विपक्षीय-वार्ताया: पश्चादेव संयुक्त-वार्ताहर-सम्मेलने प्रधानमन्त्रिणा वक्तव्यमिदं प्रकाशितम्।

श्रीमोदिना उक्तं यत् भारतामेरिकाराष्ट्रे एकविंशति-शताब्द्याम् एकस्यै रक्षा-सहभागितायै एकस्मिन् नवीने दशवर्षीये प्राग्रूपे हस्ताक्षराय घोषणाम् अकुरुताम्। प्राग्रूपमिदं पञ्चत्रिंशदधिक-द्विसहस्रतमवर्ष-पर्यन्तं प्रचलिष्यति। अस्योद्देश्यम् उभयो: देशयो: मध्ये रक्षासम्बन्धानां प्रबलीकरणं विद्यते। भारतामेरिका-देशौ त्रिंशदधिक-द्विसहस्रतम-वर्षं यावत् द्विपक्षीयं व्यापारं द्विगुणीकृत्य पञ्चशत-बिलियन्डॉलरमितं यावत् कर्तुं निर्णीतवन्तौ। सञ्जातोपवेशने अमेरिकीय-राष्ट्रपतिना उक्तं यत् भारतामेरिकादेशौ बृहत्तमेषु व्यावसायिक-मार्गेषु अन्यतमौ स्त:। असौ अमेरिकादेशत: भारतदेशाय तैल-प्राकृतिक-वातीयेन्धनयो: प्रमुखापूर्तिकरणस्य उद्देश्येन एकस्य महत्वपूर्णस्य सन्धिपत्रस्य घोषणां कृतवान्। अत्रावधौ विदेशसचिव: विक्रम-मिस्री सूचितवान् यत् भारतम् एतद्-वर्षान्ते क्वाड्-शिखरसम्मेलनस्य आतिथ्यं विधास्यति। एतदर्थं प्रधानमन्त्री नरेन्द्रमोदी डोनाल्डट्रम्पम् आमन्त्रितवान्।

**प्रधानमन्त्री / सम्वादः**

प्रधानमन्त्री नरेन्द्र-मोदी उक्तवान् यत् भारत-थाईलैंड-देशयोः मध्ये द्विसहस्रवर्षाधिकाः सुदृढ-सांस्कृतिक-संबन्धाः सन्ति। थाईलैंडे आयोजितं ‘संवाद’-इत्येतं कार्यक्रमं दृश्य-सम्वाद-तन्त्र-माध्यमेन संबोधयन् श्री-मोदी उक्तवान् यत् भारतस्य एक्ट-ईस्ट-नीतिः थाईलैंडस्य एक्ट-वेस्ट-नीतिः च परस्परं पूरके स्तः, याभ्यां पारस्परिक-प्रगतिः समृद्धिः च वर्धेते। सः उक्तवान् यत् एतत् एशियायाः पारस्परिक-दार्शनिकाध्यात्मिक-परम्पराणाम् एकं सुंदरम् उदाहरणम् अस्ति। प्रधानमन्त्रिणा उक्तं यत् अनेन सम्मेलनेन प्रकाश्यते यत् एशियायाः शताब्दिसमयः न केवलम् आर्थिकमूल्यानाम् अपितु सामाजिक-मूल्यानां विषये अपि अस्ति। श्रीमोदी सबलम् उक्तवान् यत् भगवतः बुद्धस्य शिक्षाः शान्तिपूर्णस्य प्रगतिशीलस्य च युगस्य निर्माणे विश्वस्य मार्गदर्शनं कर्तुं शक्नुवन्ति।

सः उक्तवान् यत् संघर्षैः अद्य जनाः राष्ट्राणि च अतिक्राम्य प्रकृत्या सह द्वन्द्वं विधीयते। प्रधानमन्त्रिणा कथितं यत् अनेन पर्यावरणं संकटापन्नं सञ्जातं यदस्माकं विश्वाय नितरां हानिकारकं वर्तते।

पाकिस्तानम्/विस्फोटः

पाकिस्ताने, बलूचिस्तान-प्रान्ते हरनई-स्थे शहराग-क्षेत्रे दुरापन्ने मार्गीय-विस्फोटे न्यूनातिन्यूनाः एकादश श्रमिकाः मृताः सप्त अन्ये च गभीरतया व्रणिताः जाताः। व्रणिताः निकटस्थ-चिकित्सालये प्रवेशिताः।

डब्ल्यू.पी.एल्.-क्रिकेट्

पञ्चविंशत्यधिक-द्विसहस्र-तमाब्दीयायां वुमन्स-प्रीमियर्-लीग्-क्रिकेट्-स्पर्धा-मालिकायां ह्यः गुजराते वडोदरायाः कोटाम्बी-क्रीडाङ्गणे आयोजिते औद्घाटनिके द्वन्द्वे रॉयल्-चैलेन्जर्स-बेंगलूरु-दलेन गुजरात-जायंट्स-दलं षड्भिः क्रीडकैः पराजितम्।

अद्यतने द्वन्द्वे, वडोदरायां सायं सार्धसप्त-वादने 'मुम्बई-इंडियंस्'-'डेल्ही-कैपिटल्स्'-दले स्पर्धिष्येते।

।।इति वार्ताः।।